# Pashupatabrahma Upanishad

# પાશુપતબ્રહ્મોપનિષત્

## Document Information

Text title : Pashupatabrahma Upanishad

File name : pashupata.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 77 / 108; Atharva Veda - Yoga upanishad

Latest update : August 12, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2022

*sanskritdocuments.org*

# પાશુપતબ્રહ્મોપનિષત્

પાશુપતબ્રહ્મવિદ્યાસંવેદ્યં પરમાક્ષરમ્ ।
પરમાનન્દસમ્પૂર્ણં રામચન્દ્રપદં ભજે ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ
  ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ
  વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ
  સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ
  સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથ હ વૈ સ્વયંભૂર્બ્રહ્મા પ્રજાઃ સૃજાનીતિ કામકામો જાયતે કામેશ્વરો વૈશ્રવણઃ । વૈશ્રવણો બ્રહ્મપુત્રો વાલખિલ્યઃ સ્વયંભુવં પરિપૃચ્છતિ જગતાં કા વિદ્યા કા દેવતા જાગ્રત્તુરીયયોરસ્ય કો દેવો યાનિ તસ્ય વશાનિ કાલાઃ કિયત્પ્રમાણાઃ કસ્યાજ્ઞયા રવિચન્દ્રગ્રહાદયો ભાસન્તે કસ્ય મહિમા ગગનસ્વરૂપ એતદહં શ્રોતુમિચ્છામિ નાન્યો જાનાતિ ત્વં બ્રૂહિ બ્રહ્મન્ । સ્વયંભૂરુવાચ કૃત્સ્નજગતાં માતૃકા વિદ્યા દ્વિત્રિવર્ણસહિતા દ્વિવર્ણમાતા ત્રિવર્ણસહિતા । ચતુર્માત્રાત્મકોઙ્કારો મમ પ્રાણાત્મિકા દેવતા । અહમેવ જગત્ત્રયસ્યૈકઃ પતિઃ । મમ વશાનિ સર્વાણિ યુગાન્યપિ । અહોરાત્રાદયો મત્સંવર્ધિતાઃ કાલાઃ । મમ રૂપા રવેસ્તેજશ્ચન્દ્રનક્ષત્રગ્રહતેજાંસિ ચ । ગગનો મમ ત્રિશક્તિમાયાસ્વરૂપઃ નાન્યો મદસ્તિ । તમોમાયાત્મકો રુદ્રઃ સાત્વિકમાયાત્મકો વિષ્ણૂ રાજસમાયાત્મકો બ્રહ્મા ।
ઇન્દ્રાદયસ્તામસરાજસાત્મિકા ન સાત્વિકઃ કોઽપિ અઘોરઃ

સર્વસાધારણસ્વરૂપઃ । સમસ્તયાગાનાં રુદ્રઃ પશુપતિઃ કર્તા ।
રુદ્રો યાગદેવો વિષ્ણુરધ્વર્યુર્હોતેન્દ્રો દેવતા યજ્ઞભુગ્
માનસં બ્રહ્મ માહેશ્વરં બ્રહ્મ માનસં હંસઃ
સોઽહં હંસ ઇતિ । તન્મયયજ્ઞો નાદાનુસન્ધાનમ્ ।
તન્મયવિકારો જીવઃ । પરમાત્મસ્વરૂપો હંસઃ । અન્તર્બહિશ્ચરતિ
હંસઃ । અન્તર્ગતોઽનકાશાન્તર્ગતસુપર્ણસ્વરૂપો હંસઃ ।
ષણ્ણવતિતત્ત્વતન્તુવદ્વ્યક્તં ચિત્સૂત્રત્રયચિન્મયલક્ષણં
નવતત્ત્વત્રિરાવૃતં બ્રહ્મવિષ્ણુમહેશ્વરાત્મકમગ્નિત્રયકલોપેતં
ચિદ્ગ્રન્થિબન્ધનમ્ । અદ્વૈતગ્રન્થિઃ યજ્ઞસાધારણાઙ્ગં
બહિરન્તર્જ્વલનં યજ્ઞાઙ્ગલક્ષણબ્રહ્મસ્વરૂપો હંસઃ ।
ઉપવીતલક્ષણસૂત્રબ્રહ્મગા યજ્ઞાઃ । બ્રહ્માઙ્ગલક્ષણયુક્તો
યજ્ઞસૂત્રમ્ । તદ્બ્રહ્મસૂત્રમ્ । યજ્ઞસૂત્રસંબન્ધી બ્રહ્મયજ્ઞઃ ।
તત્સ્વરૂપોઽઙ્ગાનિ માત્રાણિ મનો યજ્ઞસ્ય હંસો યજ્ઞસૂત્રમ્ ।
પ્રણવં બ્રહ્મસૂત્રં બ્રહ્મયજ્ઞમયમ્ । પ્રણવાન્તર્વર્તી હંસો
બ્રહ્મસૂત્રમ્ । તદેવ બ્રહ્મયજ્ઞમયં મોક્ષક્રમમ્ ।
બ્રહ્મસન્ધ્યાક્રિયા મનોયાગઃ । સન્ધ્યાક્રિયા મનોયાગસ્ય લક્ષણમ્ ।
યજ્ઞસૂત્રપ્રણવબ્રહ્મયજ્ઞક્રિયાયુક્તો બ્રાહ્મણઃ । બ્રહ્મચર્યેણ
હરન્તિ દેવાઃ । હંસસૂત્રચર્યા યજ્ઞાઃ । હંસપ્રણવયોરભેદઃ ।
હંસસ્ય પ્રાર્થનાસ્ત્રિકાલાઃ । ત્રિકાલસ્ત્રિવર્ણાઃ । ત્રેતાગ્ન્યનુસન્ધાનો યાગઃ ।
ત્રેતાગ્ન્યાત્માકૃતિવર્ણોઙ્કારહંસાનુસન્ધાનોઽન્તર્યાગઃ ।
ચિત્સ્વરૂપવત્તન્મયં તુરીયસ્વરૂપમ્ । અન્તરાદિત્યે જ્યોતિઃસ્વરૂપો હંસઃ ।
યજ્ઞાઙ્ગં બ્રહ્મસમ્પત્તિઃ । બ્રહ્મપ્રવૃત્તૌ તત્પ્રણવહંસસૂત્રેણૈવ
ધ્યાનમાચરન્તિ । પ્રોવાચ પુનઃ સ્વયંભુવં પ્રતિજાનીતે બ્રહ્મપુત્રો
ઋષિર્વાલખિલ્યઃ । હંસસૂત્રાણિ કતિસંખ્યાનિ કિયદ્વા પ્રમાણમ્ ।
હૃદ્યાદિત્યમરીચીનાં પદં ષણ્ણવતિઃ । ચિત્સૂત્રઘ્રાણયોઃ સ્વર્નિર્ગતા
પ્રણવધારા ષડઙ્ગુલદશાશીતિઃ । વામબાહુર્દક્ષિણકટ્યોરન્તશ્ચરતિ
હંસઃ પરમાત્મા બ્રહ્મગુહ્યપ્રકારો નાન્યત્ર વિદિતઃ ।
જાનન્તિ તેઽમૃતફલકાઃ ।
સર્વકાલં હંસં પ્રકાશકમ્ ।
પ્રણવહંસાન્તર્ધ્યાનપ્રકૃતિં વિના ન મુક્તિઃ ।
નવસૂત્રાન્પરિચર્ચિતાન્ । તેઽપિ યદ્બ્રહ્મ ચરન્તિ । અન્તરાદિત્યે ન જ્ઞાતં
મનુષ્યાણામ્ । જગદાદિત્યો રોચત ઇતિ જ્ઞાત્વા તે મર્ત્યા વિબુધાસ્તપન

પ્રાર્થનાયુક્તા આચરન્તિ ।
વાજપેયઃ પશુહર્તા અધ્વર્યુરિન્દ્રો દેવતા અહિંસા
ધર્મયાગઃ પરમહંસોઽધ્વર્યુઃ પરમાત્મા દેવતા
પશુપતિઃ બ્રહ્મોપનિષદો બ્રહ્મ । સ્વાધ્યાયયુક્તા
બ્રાહ્મણાશ્ચરન્તિ । અશ્વમેધો મહાયજ્ઞકથા ।
તદ્રાજ્ઞા બ્રહ્મચર્યમાચરન્તિ । સર્વેષાં
પૂર્વોક્તબ્રહ્મયજ્ઞક્રમં મુક્તિક્રમમિતિ બ્રહ્મપુત્રઃ
પ્રોવાચ । ઉદિતો હંસ ઋષિઃ । સ્વયંભૂસ્તિરોદધે । રુદ્રો
બ્રહ્મોપનિષદો હંસજ્યોતિઃ પશુપતિઃ પ્રણવસ્તારકઃ સ એવં વેદ ।
હંસાત્મમાલિકાવર્ણબ્રહ્મકાલપ્રચોદિતા ।
પરમાત્મા પુમાનિતિ બ્રહ્મસમ્પત્તિકારિણી ॥ ૧॥

અધ્યાત્મબ્રહ્મકલ્પસ્યાકૃતિઃ કીદૃશી કથા ।
બ્રહ્મજ્ઞાનપ્રભાસન્ધ્યાકાલો ગચ્છતિ ધીમતામ્ ।
હંસાખ્યો દેવમાત્માખ્યમાત્મતત્ત્વપ્રજા કથમ્ ॥ ૨॥

અન્તઃપ્રણવનાદાખ્યો હંસઃ પ્રત્યયબોધકઃ ।
અન્તર્ગતપ્રમાગૂઢં જ્ઞાનનાલં વિરાજિતમ્ ॥ ૩॥

શિવશક્ત્યાત્મકં રૂપં ચિન્મયાનન્દવેદિતમ્ ।
નાદબિન્દુકલા ત્રીણિ નેત્રં વિશ્વવિચેષ્ટિતમ્ ॥ ૪॥

ત્રિયઙ્ગાનિ શિખા ત્રીણિ દ્વિત્રાણાં સંખ્યમાકૃતિઃ ।
અન્તર્ગૂઢપ્રમા હંસઃ પ્રમાણાન્નિર્ગતં બહિઃ ॥ ૫॥

બ્રહ્મસૂત્રપદં જ્ઞેયં બ્રાહ્મં વિધ્યુક્તલક્ષણમ્ ।
હંસાર્કપ્રણવધ્યાનમિત્યુક્તો જ્ઞાનસાગરે ॥ ૬॥

એતદ્વિજ્ઞાનમત્રેણ જ્ઞાનસાગરપારગઃ ।
સ્વતઃ શિવઃ પશુપતિઃ સાક્ષી સર્વસ્ય સર્વદા ॥ ૭॥

સર્વેષાં તુ મનસ્તેન પ્રેરિતં નિયમેન તુ ।
વિષયે ગચ્છતિ પ્રાણશ્ચેષ્ટતે વાગ્વદત્યપિ ॥ ૮॥

ચક્ષુઃ પશ્યતિ રૂપાણિ શ્રોત્રં સર્વં શ‍ૃણોત્યપિ ।
અન્યાનિ કાનિ સર્વાણિ તેનૈવ પ્રેરિતાનિ તુ ॥ ૯॥

સ્વં સ્વં વિષયમુદ્દિશ્ય પ્રવર્તન્તે નિરન્તરમ્ ।

પ્રવર્તકત્વં ચાપ્યસ્ય માયયા ન સ્વભાવતઃ ॥ ૧૦॥

શ્રોત્રમાત્મનિ ચાધ્યસ્તં સ્વયં પશુપતિઃ પુમાન્ ।
અનુપ્રવિશ્ય શ્રોત્રસ્ય દદાતિ શ્રોત્રતાં શિવઃ ॥ ૧૧॥

મનઃ સ્વાત્મનિ ચાધ્યસ્તં પ્રવિશ્ય પરમેશ્વરઃ ।
મનસ્ત્વં તસ્ય સત્ત્વસ્થો દદાતિ નિયમેન તુ ॥ ૧૨॥

સ એવ વિદિતાદન્યસ્તથૈવાવિદિતાદપિ ।
અન્યેષામિન્દ્રિયાણાં તુ કલ્પિતાનામપીશ્વરઃ ॥ ૧૩॥

તત્તદ્રૂપમનુ પ્રાપ્ય દદાતિ નિયમેન તુ ।
તતશ્ચક્ષુશ્ચ વાક્ચૈવ મનશ્ચાન્યાનિ ખાનિ ચ ॥ ૧૪॥

ન ગચ્છન્તિ સ્વયંજ્યોતિઃસ્વભાવે પરમાત્મનિ ।
અકર્તૃવિષયપ્રત્યક્પ્રકાશં સ્વાત્મનૈવ તુ ॥ ૧૫॥

વિના તર્કપ્રમાણાભ્યાં બ્રહ્મ યો વેદ વેદ સઃ ।
પ્રત્યગાત્મા પરંજ્યોતિર્માયા સા તુ મહત્તમઃ ॥ ૧૬॥

તથા સતિ કથં માયાસંભવઃ પ્રત્યગાત્મનિ ।
તસ્માત્તર્કપ્રમાણાભ્યાં સ્વાનુભૂત્યા ચ ચિદ્ઘને ॥ ૧૭॥

સ્વપ્રકાશૈકસંસિદ્ધે નાસ્તિ માયા પરાત્મનિ ।
વ્યાવહારિકદૃષ્ટ્યેયં વિદ્યાવિદ્યા ન ચાન્યથા ॥ ૧૮॥

તત્ત્વદૃષ્ટ્યા તુ નાસ્ત્યેવ તત્ત્વમેવાસ્તિ કેવલમ્ ।
વ્યાવહારિક દૃષ્ટિસ્તુ પ્રકાશાવ્યભિચારિતઃ ॥ ૧૯॥

પ્રકાશ એવ સતતં તસ્માદદ્વૈત એવ હિ ।
અદ્વૈતમિતિ ચોક્તિશ્ચ પ્રકાશાવ્યભિચારતઃ ॥ ૨૦॥

પ્રકાશ એવ સતતં તસ્માન્મૌનં હિ યુજ્યતે ।
અયમર્થો મહાન્યસ્ય સ્વયમેવ પ્રકાશિતઃ ॥ ૨૧॥

ન સ જીવો ન ચ બ્રહ્મા ન ચાન્યદપિ કિંચન ।
ન તસ્ય વર્ણા વિદ્યન્તે નાશ્રમાશ્ચ તથૈવ ચ ॥ ૨૨॥

ન તસ્ય ધર્મોઽધર્મશ્ચ ન નિષેધો વિધિર્ન ચ ।
યદા બ્રહ્માત્મકં સર્વં વિભાતિ તત એવ તુ ॥ ૨૩॥

તદા દુઃખાદિભેદોऽયમાભાસોऽપિ ન ભાસતે ।
જગજ્જીવાદિરૂપેણ પશ્યન્નપિ પરાત્મવિત્ ॥ ૨૪॥

ન તત્પશ્યતિ ચિદ્રૂપં બ્રહ્મવસ્ત્વેવ પશ્યતિ ।
ધર્મધર્મિત્વવાર્તા ચ ભેદે સતિ હિ ભિદ્યતે ॥ ૨૫॥

ભેદાભેદસ્તથા ભેદાભેદઃ સાક્ષાત્પરાત્મનઃ ।
નાસ્તિ સ્વાત્માતિરેકેણ સ્વયમેવાસ્તિ સર્વદા ॥ ૨૬॥

બ્રહ્મૈવ વિદ્યતે સાક્ષાદ્વસ્તુતોऽવસ્તુતોऽપિ ચ ।
તથૈવ બ્રહ્મવિજ્જ્ઞાની કિં ગૃહ્ણાતિ જહાતિ કિમ્ ॥ ૨૭॥

અધિષ્ઠાનમનૌપમ્યમવાઙ્મનસગોચરમ્ ।
યત્તદદ્રેશ્યમગ્રાહ્યમગોત્રં રૂપવર્જિતમ્ ॥ ૨૮॥

અચક્ષુઃશ્રોત્રમત્યર્થં તદપાણિપદં તથા ।
નિત્યં વિભું સર્વગતં સુસૂખ્મં ચ તદવ્યયમ્ ॥ ૨૯॥

બ્રહ્મૈવેદમમૃતં તત્પુરસ્તાદ્-
    બ્રહ્માનન્દં પરમં ચૈવ પશ્ચાત્ ।
બ્રહ્માનન્દં પરમં દક્ષિણે ચ
    બ્રહ્માનન્દં પરમં ચોત્તરે ચ ॥ ૩૦॥

સ્વાત્મન્યેવ સ્વયં સર્વં સદા પશ્યતિ નિર્ભયઃ ।
તદા મુક્તો ન મુક્તશ્ચ બદ્ધસ્યૈવ વિમુક્તતા ॥ ૩૧॥

એવંરૂપા પરા વિદ્યા સત્યેન તપસાપિ ચ ।
બ્રહ્મચર્યાદિભિર્ધર્મૈર્લભ્યા વેદાન્તવર્ત્મના ॥ ૩૨॥

સ્વશરીરે સ્વયંજ્યોતિઃસ્વરૂપં પારમાર્થિકમ્ ।
ક્ષીણદોષઃ પ્રપશ્યન્તિ નેતરે માયયાવૃતાઃ ॥ ૩૩॥

એવં સ્વરૂપવિજ્ઞાનં યસ્ય કસ્યાસ્તિ યોગિનઃ ।
કુત્રચિદ્ગમનં નાસ્તિ તસ્ય સમ્પૂર્ણરૂપિણઃ ॥ ૩૪॥

આકાશમેકં સમ્પૂર્ણં કુત્રચિન્ન હિ ગચ્છતિ ।
તદ્વદ્બ્રહ્માત્મવિચ્છ્રેષ્ઠઃ કુત્રચિન્નૈવ ગચ્છતિ ॥ ૩૫॥

અભક્ષ્યસ્ય નિવૃત્ત્યા તુ વિશુદ્ધં હૃદયં ભવેત્ ।
આહારશુદ્ધૌ ચિત્તસ્ય વિશુદ્ધિર્ભવતિ સ્વતઃ ॥ ૩૬॥

ચિત્તશુદ્ધૌ ક્રમાજ્જ્ઞાનં ત્રુટ્યન્તિ ગ્રન્થયઃ સ્ફુટમ્ ।
અભક્ષ્યં બ્રહ્મવિજ્ઞાનવિહીનસ્યૈવ દેહિનઃ ॥ ૩૭॥

ન સમ્યગ્જ્ઞાનિનસ્તદ્વત્સ્વરૂપં સકલં ખલુ ।
અહમન્નં સદાન્નાદ ઇતિ હિ બ્રહ્મવેદનમ્ ॥ ૩૮॥

બ્રહ્મવિદ્ગ્રસતિ જ્ઞાનાત્સર્વં બ્રહ્માત્મનૈવ તુ ।
બ્રહ્મક્ષત્રાદિકં સર્વં યસ્ય સ્યાદોદનં સદા ॥ ૩૯॥

યસ્યોપસેચનં મૃત્યુસ્તં જ્ઞાની તાદૃશઃ ખલુ ।
બ્રહ્મસ્વરૂપવિજ્ઞાનાજ્જગદ્ભોજ્યં ભવેત્ખલુ ॥ ૪૦॥

જગદાત્મતયા ભાતિ યદા ભોજ્યં ભવેત્તદા ।
બ્રહ્મસ્વાત્મતયા નિત્યં ભક્ષિતં સકલં તદા ॥ ૪૧॥

યદાભાસેન રૂપેણ જગદ્ભોજ્યં ભવેત તત્ ।
માનતઃ સ્વાત્મના ભાતં ભક્ષિતં ભવતિ ધ્રુવમ્ ॥ ૪૨॥

સ્વસ્વરૂપં સ્વયં ભુઙ્ક્તે નાસ્તિ ભોજ્યં પૃથક્ સ્વતઃ ।
અસ્તિ ચેદસ્તિતારૂપં બ્રહ્મૈવાસ્તિત્વલક્ષણમ્ ॥ ૪૩॥

અસ્તિતાલક્ષણા સત્તા સત્તા બ્રહ્મ ન ચાપરા ।
નાસ્તિ સત્તાતિરેકેણ નાસ્તિ માયા ચ વસ્તુતઃ ॥ ૪૪॥

યોગિનામાત્મનિષ્ઠાનાં માયા સ્વાત્મનિ કલ્પિતા ।
સાક્ષિરૂપતયા ભાતિ બ્રહ્મજ્ઞાનેન બાધિતા ॥ ૪૫॥

બ્રહ્મવિજ્ઞાનસમ્પન્નઃ પ્રતીતમખિલં જગત્ ।
પશ્યન્નપિ સદા નૈવ પશ્યતિ સ્વાત્મનઃ પૃથક્ ॥ ૪૬॥ ઇત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્ૃણુયામ દેવાઃ
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ
વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ પાશુપતબ્રહ્મોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Pashupatabrahma Upanishad*

pdf was typeset on September 14, 2022

Please send corrections to *sanskrit@cheerful.com*